The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 03 | Issue: 01 | Mar - May, 2026 | ISSN: 3048-9660 (Online) | www.thebrahmi.com

# याज्ञवल्क्यशिक्षायां स्वरविमर्शः

**Dr. Balabhadra Karna**
Asst. Professor (Guest Faculty),
Gangadhar Meher University, Amruta Vihar, Sambalpur

**उपक्रमः**

वेदःभारतीयार्याणाम् आत्मा इव प्रतिभाति । एषः वैदिकार्याणाम् आधारग्रन्थः भवति । यतोहि विविधेषु शास्त्रेषु वेदः प्राचीनतमः प्रसिद्धश्चास्ति, तस्मात् हेतोः मानवानां कृते एषः ज्ञानराशेः प्रकाशकः भवति अपि च मानवसमाजस्य कल्याणं साधयति । वैदिकवाङ्मये तत्वानुसन्धानस्य विविधविषयाः चर्च्चिताः विश्लेशिताः च सन्ति । एते विषयाः भारतीयसंस्कृतेः आधारस्वरुपाः जीवनधायकाः वा भवन्ति । वैदिकवाङ्मये चतुर्वर्णानां, चतुराश्रमाणां, षोडशसंस्काराणां, स्तुतिपरकमन्त्राणां च वहवः विषयाः समुपलब्धाः सन्ति । परन्तु एतेषां तत्वानां ज्ञानाय पुरुषार्थः प्राप्त्यर्थञ्च वैदिकस्वराणां ज्ञानम् अपरिहार्यम् । स्वरज्ञानं विना वेदमन्त्राणाम् अर्थज्ञानं न सम्भवति । अतः शोधपत्रेऽस्मिन् याज्ञवल्क्यशिक्षायां वर्णितेषु स्वरेषु स्वरितस्वरविषये मया चर्च्चा विहिताः । यतोहि वैदिकसाहित्ये स्वरस्य महत्वमनस्वीकार्यम् । स्वरस्याधारेण वेदः विदुषां मनसि श्रेष्ठत्वमावहति । समग्रविश्वे विद्वांसः वैदिक मन्त्राणामुचारणेन अभिभूताः भवन्ति । वेदस्य सम्यगुच्चारणं स्वरेण एव सम्भवति । अतः स्वरज्ञानार्थम् अत्र याज्ञवल्क्यशिक्षायाः विश्लेषणं क्रियते । महर्षिः याज्ञवल्क्यः अस्य शिक्षाग्रन्थस्य कर्ता । अयं ग्रन्थः शुक्लयजुर्वेदस्य सर्वप्राचीनशिक्षाग्रन्थः । ग्रन्थोऽयं कारिकात्मकः भवति । अस्मिन् ग्रन्थे षट्सन्ति । अस्य शिक्षाग्रन्थस्य मध्ये (२३६)त्रिंशदधिकद्विशतसंख्याकाः कारिकाः- मध्ये गद्यरूपाणि अपि दृश्यन्ते ।सम्पूर्णेशिक्षाग्रन्थे वर्णस-वल-मात्रा-स्वर-ाम सन्तानानां वर्णनं क्रियते ।-एतेषु स्वराः वेदानां सार्थकर्तां प्रतिपादयन्ति । अतः प्रसङ्गेऽस्मिन् याज्ञवल्क्यशिक्षायामुक्तमस्तिउदात्तादिस्वराणां सम्यगुचारणेन जनः - ऋग्यजुसामभिः पवित्रं भूत्वा ब्रह्मलोकं प्राप्नोति ।[i]

**१कुञ्चिकाशब्दाः ०.**

वेदाङ्गः ,याज्ञवल्क्यशिक्षा,सन्तानः ,सामः ,वलं ,मात्रा ,स्वरः ,वर्णः , उदात्तः ,प्रचयः ,स्वरितः ,अनुदात्तः , ,कम्पस्वरःजात्यःअ ,भिनिहितः ,क्षैप्रः , प्रश्लिष्टः ,तैरोव्यञ्जनः ,तैरोविरामकः ,पादवृत्तः, ताथाभाव्यश्च ।

**१याज्ञवल्क्यशिक्षायाः परिचयः १.**

महर्षिः याज्ञवल्क्यः अस्य याज्ञवल्क्यशिक्षाग्रन्थस्य कर्ता । महर्षियाज्ञवल्क्यविषये वैदिकसाहित्ये बृहदारण्यकोपनिषदि[ii] मत्स्यपुराणे[iii] वायुपुराणे[iv] ब्रह्माण्डपुराणे[v] स्कन्दपुराणे[vi] विष्णुपुराणे[vii]- च वर्णना क्रियते । अयं ग्रन्थः शुक्लयजुर्वेदस्य सर्वप्राचीनशिक्षाग्रन्थः । ग्रन्थोऽयं कारिकात्मकः भवति । ग्रन्थेऽस्मिन् षट्त्रिंशदधिकद्विशतसंख्याकाः - सन्ति । अस्य शिक्षाग्रन्थस्य मध्ये मध्ये गद्यरूपाणि अपि दृश्यन्ते । (२३६)कारिकाः

Volume: 03 | Issue: 01 | Mar - May, 2026 | ISSN: 3048-9660 (Online) | www.thebrahmi.com

**१.२ स्वरशब्दस्य परिचयः**

स्वरशब्दस्य प्रयोगः शिक्षाशास्त्रेषु प्रामुख्येन द्वयोः अर्थयोः भवति । प्रथमतः स्वरः नाम स्वरवर्णाः अ आ इ ई उ ऊ ऋ लृ ए ओ ऐ औ चेति । द्वितीयतः स्वरः नाम उदात्तस्वरितान् -अनुदात्त-स्वरिताख्याः वर्णधर्माः । एतान् उदात्त-अनुदात्त-स्वर -अतिरिच्य वर्णोच्चारणे तानस्य अपि प्रयोगः भवति । तानस्वरः नित्यस्वरः इति कात्यायनश्रौतसूत्रे वर्ण्यते । तथा हि - तानो वा नित्यत्वात् ।[viii] वैदिकवाङ्मये एते स्वराः उदात्तादिस्वररूपेण आभाषिताः भवन्ति । यत्त शब्दकल्पद्रुमेऽपि स्वीक्रियते । यथा-

**स स्वरो यः श्रुतिस्थाने खनन हृदयरञ्जकः ।।**

**षडजर्षभगान्धारो मध्यमः पञ्चमस्तथा ।**

**धैवतश्च निषादश्च स्वराः सप्त प्रकीर्त्तिताः ।।[ix]**

अर्थात, हृदयरञ्जकः उदात्तादिस्वरः षडनादिमध्ये अन्तर्निहिताः सन्ति । एते शब्दं कृत्वा आनन्दं वितोनन्ति । यथा-स्वरन्ति शब्दायन्ते स्वराः स्व ऊ शब्दोपतापयोः पचादित्वदन् । इति भरतः ।।[x]

**१स्वरस्य महत्वम् ३.**

वैदस्यार्थज्ञानाय स्वरज्ञानम् आवश्यकमिति जैमिनीयमीमांसासूत्रस्य भाष्ये शवरेण कथ्यते यत्-

**अथ त्रैस्वरादीनां कथं समाम्नानमिति ?**

**अर्थाऽवबोधनार्थं भविष्यति ।।[xi]**

अर्थात् स्वरः वेदस्य विशेषार्थं बोधयति, येन अभीष्टसिद्धिर्भवति । मन्त्रोच्चारणे स्वराः यदि यथावदनुच्चार्य विपरीतमुच्चार्यन्ते, तर्हि यज्ञकर्म निष्फलं भवति । विषयेऽस्मिन् वाजसनीयप्रातिशाख्ये उवटेनोक्तम्-

**मन्त्रस्तु यदि मनागपि स्वरतो वर्णतो वा हीनो भवति, अथ कर्मासमृद्धिः ।**

**न केवलं कर्मासमृद्धिः, किन्तर्हि ? दुष्टिहेतुः प्रत्यवायः स्यात् ।।[xii]**

वेदः शब्दोऽयम् आयुदात्तः भवेच्चेत् वेदशब्दस्य अर्थः श्रुतिः इति भवति । परन्तु यदा वेदशब्दः अन्तोदात्तः भवति तदा वेदशब्द दर्शपूर्णमासयागेषु प्रयुक्तं कुशमुष्टिं इति अर्थं बोधयति । अतः वैदिक मन्त्रोचारणस्य शुद्धतामत्यावश्यकं भवति । विषयेऽस्मिन् पाणिनीयशिक्षायामपि वर्णनं क्रियते ।[xiii] वेदभाष्यकारेण आचार्यवेङ्कटमाधवेन वर्ण्यते यत् यथा अन्धकारे जनः दीपशिखायां गच्छति चेत् न पतति तथैव स्वराणामाधारेण कश्चित् जनः यदि वेदस्य मन्त्रार्थं जानाति तर्हि मन्त्राणां सम्यगर्थज्ञानकारणात् तस्य अधोपतनं न भवति । तथा हि-

**अन्धकारे दीपिकाभिर्गच्छन्न स्खलति कचित् ।**

**एवं स्वरैः प्रणीतानां भवन्त्यर्था स्फुरा इति ।।[xiv]**

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 03 | Issue: 01 | Mar - May, 2026 | ISSN: 3048-9660 (Online) | www.thebrahmi.com

**१४. स्वरशब्दस्य व्युत्पत्तिः**

सार्थकस्वरशब्दः गत्यर्थकः √स्वर् धातुतः अच्प्रत्ययेन निष्पतिर्भवति । यस्यार्थो भवति-स्वर्यन्ते अर्थाः एभिः इति स्वराः । निघण्ठुग्रन्थे प्रयुक्तो स्वरितशब्दः गत्यर्थे प्रयुक्तं भवति । अतः स्वरस्य एवम्भूता व्युत्पत्तिः ग्रहणयोग्या ।[xv]

**१.५ स्वरशब्दस्यार्थः**

वैदिकसाहित्ये स्वरशब्दः बहुषु अर्थेषु प्रयुज्यते इति युधिष्ठिरमीमांसकः स्वग्रन्थे उद्धरति ।[xvi] यथा-

**१.५.१प्राणः प्राणः स्वरः । प्राणो वै स्वरः ।[xvii] . स्वरो नासा समीरिते स्यात् ।।[xviii]**

**१.५.२एष ह वै सूर्यो भूत्वाऽमूष्मिन् लोके स्वरिति । तद्वत् स्वरति तस्मात् स्वरः । -सूर्यः .।[xix]**

**१.५.३ यदाह -सोमः .स्वरोऽसीति सोमं वा एतदाह ।।[xx]**

**१६. स्वरशब्दस्य पर्यायवाचकशब्दाः**

प्राचीनग्रन्थेषु स्वारः, यमः, गोः, जातिश्चेति स्वरस्य पर्यायवाकशब्दाः भवन्ति । यथा-

**१.१.६.स्वारः ब्राह्मणे तूदात्तानुदात्तौ भाषिकस्वारौ । -।[xxi]**

**१.२.६.यमः तौत्तिरीयप्रातिशाख्ये यमशब्दस्य प्रयोगः - स्वरस्य पर्यायत्वेनापि क्रियते ।।**

**१ ७.स्वरस्याश्रयः**

शौनकशिक्षानुसारम् उदात्तादिस्वराः स्वरवर्णादीनां धर्माः इति वर्ण्यन्ते । स्वरवर्णानां भेदेऽपि एते स्वराः आगच्छन्ति । अतः स्वरवर्णानामन्तर्हितत्वात् उदात्तादिस्वराणाम् आश्रयाः स्वरवर्णाः एव भवन्ति । बिषयेऽस्मिन् शौनकशिक्षायामुक्तमस्ति-

**द्विविधश्च स्वरो ज्ञेयो नासिक्यस्सानुनासिकः ।**
**उदात्तश्चानुदात्तश्च स्वरितः प्रचयस्तथा ।।[xxii]**

याज्ञवल्क्यशिक्षाऽपि अच्वर्णानाम् आश्रयेण एव -वर्णानां प्राधान्यं स्वीकरोति । अर्थात् उदात्तादिस्वराः अच्-तिष्ठन्ति । पुनश्चव्यञ्जनवर्णाः येन प्रकारेण स्वराणाम् आश्रयेण उच्चार्यन्ते तेनैव प्रकारेण अच्वर्णानाम् आश्रये एते स्वराः -उच्चार्यन्ते । येन प्रकारेण सूत्रस्याधारेण मालायां स्थिताः मणयः सुरक्षिताः भवन्ति, तथैव स्वरवर्णैः युक्ताः स्वराः सुरक्षिताः भवन्ति । उक्तञ्च याज्ञवल्क्यशिक्षायाम्-

**स्वरः उच्चस्वरो नीचः स्वरः स्वरितो एव च ।-**
**स्वरप्रधानं त्रैस्वर्यं व्यञ्जनं तेन सस्वरम् ।।**
**मणिवत् व्यञ्जनान्याहुः सूत्रवत् स्वरः इष्यते ।**
**व्यञ्जनान्यनुवर्त्तन्ते यत्र तिष्ठति सस्वरः ।।[xxiii]**

काशिकाकारेणाऽपि स्वरस्याश्रयविषये तथा धर्मविषये वर्ण्यते यत्उदात्तादिशब्दाः स्वरे वर्णधर्मे लोकवेदयोः -

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 03 | Issue: 01 | Mar - May, 2026 | ISSN: 3048-9660 (Online) | www.thebrahmi.com

प्रसिद्धा एव ।[xxiv] लोकवेदयोः प्रसिद्धौ गुणावेव वर्णधर्मावुदात्तानुदात्तौ गृह्यते ।[xxv] उदात्तत्वादीनामज्धर्म तथा एव लोक प्रसिद्धत्वेन ।।[xxvi]

**१याज्ञवल्क्यशिक्ष ८.ायां स्वराणां भेदाः**

वैदिकसाहित्ये प्रयुक्ताः स्वराः प्रामुख्येन उदात्तः अनुदात्तः स्वरितश्च त्रिभिः भेदैः विभक्ताः भवन्ति । एते स्वराः स्वोच्चारणस्थानस्याधारेण परिचिताः भवन्ति । सामान्यरूपेण यः स्वरः ताल्वादि सभागेषु उर्ध्वदेशे उच्चारितः सः उदात्तः । यः स्वरः ताल्वादिषु सभागेष अधोदेशे उच्चारितः सः अनुदात्तः यः स्वरः उदात्तानुदात्तयोः समाहारेण उच्चारित, सः स्वरितः चेति ।

**११.८. स्वरितस्वरः तस्य भेदाश्च**

उदात्तानुदात्तयोः स्वरयोः मिलितरुपमेव स्वरितस्वरः इति कथ्यते । पाणिनिना अष्टाध्यायीग्रन्थे वर्ण्यते यत् - समाहारः स्वरितः । अर्थात (३१.२.१.पा)ृ, उदात्तत्वानुदात्तत्वे वर्णधर्मौ सभाह्रीयते यस्मिन् सोऽच् स्वरितसंज्ञः स्यात् । वैदिकसाहित्ये प्रयुक्तस्य स्वरितस्वरस्य सूचनार्थं वर्णस्य उपरि दण्डायमानरेखा दीयते । उदाहरणं यथा-अं ।

**अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजम् ।**

**होतारं रत्नधातमम् ।।**[xxvii]

संङ्गीतशास्त्रे प्रयुक्ताः षडज पञ्चमाः इत्येते स्वराः स्वरितस्वरात् सृष्टाः भवन्तीति-मध्यम-वर्ण्यन्ते । ऋक्यातिशाख्येऽपि उवटेन विषयेऽस्मिन् आलोच्यते । यथास्वरितस्वरः -उदातत्तानुदात्तौ सस्बरौ तयोः लक्षणम् एवं प्रदीयते-निष्पद्यते ।।[xxviii] वाजसनेयप्रातिशाख्ये स्वरितस्वरस्य उभयवान्त्स्वरितः।।[xxix]

स्वरितस्वरः अष्टविधः इति याज्ञवल्क्यशिक्षायां स्वरभक्तिलक्षणपरिशिष्टशिक्षाग्रन्थे[xxx] केशवीशक्षाग्रन्थे[xxxi] वर्णरत्नपदीपिकाशिक्षाग्रन्थे[xxxii] च उल्लिख्यते । यथा-

**अष्टौ स्वरान् प्रवक्ष्यामि तेषामेव तु लक्षणम् ।**

**जात्योऽभिनिहितः क्षेत्रः प्रश्लिष्टश्च तथाऽपरः ।।**

**तैरोव्यञ्जनसंज्ञश्च तथा तैरोविरामकः ।**

**पादवृत्तो भवेत् तद्वत् ताथाभाव्य इति स्वराः ।।**[xxxiii]

**१ .क.१.८.जात्यस्वरितः**

जात्यस्वरितः नित्यस्वरितो नाम्नाऽपि परिचितो अस्ति । नित्यशब्दस्यार्थो भवति स्थिरः शास्यतः चिरन्तनश्च । अर्थात्, कस्यामपि परिस्थित्यां यस्य परिवर्तनं न भवति, सः स्वरः नित्यस्वरः । अत्र जात्यशब्दस्यार्थो भवति जन्मनः उत्पन्नः स्वभावात् उत्पन्नश्च । अयं स्वरः उदात्तस्वरात् सन्धेः चापि उत्पन्नो न भवति, अपितु प्रागेव अयं विराजते । परन्तु

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 03 | Issue: 01 | Mar - May, 2026 | ISSN: 3048-9660 (Online) | www.thebrahmi.com

ऋक्यातिशाख्ये एकस्मिन् पये उदात्तपूर्वे स्वरिते सति अन्यः यः स्वरः उच्चार्यते, सः जात्यस्वरः इति कथ्यते। यथा-

**अतोऽन्यत्स्वरितं स्वारं जात्यमाचक्षते पदे ।।**[xxxiv]

**१.ख.१.८. अभिनिहितस्वरितः**

अभिनिहितस्वरितस्वरस्य लक्षणम् उदाहरणञ्च-

**ए ओ आद्यामुदात्ताभ्यामकारो रिफितश्च यः ।**

**अकारो तुप्यते यत्र तं चाभिनिहितं विदुः ।।**[xxxv]

अर्थात् ओकाराभ्याम् परे यः अनुदात्तस्वरयुक्तः अकारः यत्र उदात्तस्वरयुक्ताभ्याम् एकार, ओकारे वा विलीनः भवति, पूर्ववर्णे तादृशस्य एकारस्य ओकारस्य च अभिनिहितस्वरितस्वरः भवति । यथाकुक - ्कुटः +असि = कुक्कुटोऽसि । श्वात्रः +असि = श्वात्रोऽसि । इत्यत्र कुकुटस्थः ओकारः तथा श्वात्रस्थः ओकारः अभिनिहितस्वरितस्वरविशिष्टः भवति। तेतेऽवन्तु। इत्यत्र ते इत्यस्य एकारस्य अभिनिहितस्वरितस्वरः भवति = अवन्तु + । संक्षेपेण पूर्वसवर्णसन्धौ पूर्वसवर्णपदस्यएकारस्य ओकारस्य च अभिनिहितस्वरितस्वरः भवति।

**१ .ग.१.८.क्षैप्रस्वरितः**

उदात्तस्वरविशिष्टयोः इकारउकारयोः पश्चात् अनुदात्तस्वरधर्मी असमानस्व-रवर्णः यदि स्यात्, इकारउकारयोः - क्रमानुसारं यकारः वकारश्च भवेश्चेत्, तत्र सन्धिजस्वरितः क्षैप्रस्वरः भवति। अर्थात्, इकारस्य उकारस्य वा पश्चात् असवर्णः स्वरः भवति चेत् परिणामस्वरुपः इकारस्य स्थाने यकारः भवति, उकारस्य च स्थाने वकारः भवतीति । विषयेऽस्मिन् याज्ञवल्क्यशिक्षायाम् उदाहरणरुपेण दीयते यत्=त्र्यम्वकम्+ त्रि अमवकम् -त्र्यम्वकम् । द्रु अन्नः = द्र्युन्नः । वीड़ु +अङ्गः बी=ड्वङ्गः। वाजी +अर्वन् =व्याज्यर्व्वन्।

**१ .घ.१.८.प्रश्लिष्टस्वरितः**

यत्र उदात्तत्वगुणविशिष्टस्य इकारस्य अनुदात्तत्वगुणविशिष्टेन इकारेण सह सम्मेलनेन यत्दीर्घरुपं भवति सः दीर्घसन्धितः उत्पन्नः स्वरः प्रक्लिष्टस्वरितः इति कथ्यते। एतस्योदाहरणं यथा -अभिअ= इन्वताम् +भीन्वताम्। स्नुचि इव + =स्नुचीव।

**१ .ङ.१.८.तैरोव्यञ्जनस्वरितः**

तिरः अन्तर्धानम् तस्य भावः तैरम् । तैरं व्यञ्जनं यस्य सः तैरोव्यञ्जनः स्वरितः । एतद् व्युत्पत्यनुसारं ज्ञायते यत् स्वरद्वयस्य अन्तर्धानम् भवति तैरोव्यञ्जनम्।

**उदात्तपूर्वो यत्किञ्चिद् व्यञ्जनेन युतः स्वरः ।**

**एष सर्वो बहुस्वारस्तैरोव्यञ्जन उच्यते ।।**[xxxvi]

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 03 | Issue: 01 | Mar - May, 2026 | ISSN: 3048-9660 (Online) | www.thebrahmi.com

अर्थात् तर्हि तत्र तैरोव्यञ्जनः, यदि व्यञ्जनवर्णपूर्वात् स्वरितगुणविशिष्टः उदात्तस्वरः स्यात्, स्वरितस्वरः भविष्यति । यथा ईडें । रन्तें । हव्यें । काम्यें । चन्द्रें । ज्योतें । अदितिं । सरस्वति ।

महि। विश्श्रुति ।

**१.च.१.८. तैरोविरामस्वरितः**

तिरः अन्तर्धानम् तस्य भावः तैरम् । तैरं विरामः यस्य सः तैरोविरामः स्वरितः । एतद् व्युत्पत्यनुसारं ज्ञायते यत् स्वरद्वयस्य अन्तर्धानम् भवति तैरोविरामः स्वरितः। यथा गोमदिति -। गो । मोत् । गोपंताविति गो ।

**अवग्रहात् परो यस्तु स्वरितः स्यादनन्तरः ।**

**तैरोविरामं तं विद्यादु उदात्तो यद्यवग्रहः ।।**[xxxvii]

**१ .छ.१.८.पादवृत्तस्वरितः**

पावृत्तस्वरितस्वरस्य लक्षणम् उदाहरणञ्च--

**स्वरे च स्वरिते चैव विवृत्तिर्यत्र दृश्यते ।**

**पादवृत्ते भवेत् स्वारः काईमिति निदर्शनम् ।।**[xxxviii]

अर्थात्, स्वरितस्वरात् परं यदि विवृत्तिः स्यात्, तर्हि सः स्वरितस्वरः पादवृत्तस्वरितस्वरः इति कथ्यते ।यथा - श्वि॒त्रऽआदि॒त्यानाम् । कांऽईम् ।

**१ .ज.१.८.ताथाभाव्यस्वरितः**

साधाभाव्यस्वरितस्वरस्य लक्षणम् उदाहरणञ्च

**उदात्ताक्षरयोर्मध्ये भवेन्नीचस्त्ववग्रहः ।**

**ताथाभाव्यो भवेत् स्वारस्तनूनम्रे निदर्शनम् ।।**[xxxix]

अर्थात् उदात्तस्वरयोः मध्ये यदि अनुदात्तस्वरविशिष्टः अवग्रहः स्यात् तर्हि तत्र ताथाभाव्यस्वरितस्वरः भवति । यथा तनूनप्पत्रऽइति तनूनपातमिति । = नपांत् + तनू नप्पुत्रे । तन् =

जात्ययदा उदात्तस्वरे स्वरे व ,प्रश्लिष्टस्वराः कम्पस्वरितं प्राप्नुवन्ति-क्षैप्र-अभिनिहित-ा परे स्यात् । तथा चोक्तं ऋक्प्रातिशाख्ये—

**जात्योऽभिनिहितश्चैव क्षैप्रः प्रश्लिष्ट एव च ।**

**एते स्वराः प्रकम्पन्ते यत्रोच्चस्वरितोदयाः ।।**[xl]

**१ उपसंहारः ९.**

एवंरूपेण वैदिकवाङ्मये वर्णितेषु बहुषु शिक्षाग्रन्थेषु शब्दानां मन्त्राणां वा सम्यगुच्चारणविधिं प्रदर्श्य संस्कृतभाषायाः प्रकृतमाधुर्यवर्द्धनं पुरःसरं मन्त्रार्थो वोधने ज्ञानं वितनोति । अतः वेदज्ञानं वेदस्यार्थज्ञानं विषयेषु वा यस्य

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 03 | Issue: 01 | Mar - May, 2026 | ISSN: 3048-9660 (Online) | www.thebrahmi.com

कस्यापि आग्रहं भवेच्चेत् तस्य कृते वैदिकस्वरज्ञानम् अपरिहार्यं भवति । स्वरज्ञानं विना वेदस्यार्थज्ञानं नैव सम्भाव्यते । अतः साम्प्रतिककाले वयं यदि स्वरज्ञानस्य जिज्ञासा कुर्मः तर्हि वेदस्य रक्षणेन साकं वेदार्थज्ञानं प्राप्तुं सक्षमं भविष्यामः । अतः मया अस्मिन् शोधपत्रे याज्ञवल्क्यशिक्षायां वर्णितस्वरविषये वर्णनं क्रियते ।

**पादटीका**

---

[i] द्र.स्वरवर्णान् प्रयुञ्जानो हस्तेनाधीतमाचरन् ।
ऋग्यजुःसामभिः पूतो ब्रह्मलोकम् अवाप्नुयात् ।। याज्ञवल्क्यशिक्षा४३-कारिका ,

[ii] द्र२ बृहदारण्यकोपनिषद् ..४ (मैत्रेयी सम्वादे-याज्ञवल्क्य) १.

[iii] द्र१९७ मत्स्यपुराण ..४

[iv] द्र९१ वायुपुराण ..९८

[v] द्र६७ ब्रह्माण्डपुराण ..७०

[vi] द्र१३० स्कन्दपुराण ..२३,

[vii] द्र३ बिष्णुपुराण ..५५८.

[viii] द्र१ कात्यायनश्रौतसूत्रम् ..८१८.

[ix] द्र४७५ शब्दकल्पद्रुमः पृष्टाङ्कः ,राजराधाकान्तदेवेन सम्पादितं प्रथमभागः ., तृतीयसंस्करणम् १९६७

[x] द्रतत्रैव .

[xi] द्र९ जैमिनीयसूत्रे शावरभाष्ये ..२३.

[xii] द्र वाजसनेयप्रातिशाख्यमुपरि उवटभाष्यम् .१४.

[xiii] द्रमन्त्रोहीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।.
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोपराधात् ।। पा।। ५२.का.शि.

[xiv] द्र१ स्वराष्टकम्..८

[xv] द्र२ निघण्टु ..४

[xvi] द्र८.युधिष्टिरमीमांसकद्वारा सम्पादितं वैदिकस्वरवोधः पृ .

[xvii] द्र७ ताण्ड्यब्राह्मणम् ..१६.११.२४ ,२.१२.१७ ,१०.

[xviii] द्र९४ मेदिनीकोषः .

[xix] द्र१ गोपथब्राह्मणम् ..५१४.

[xx] द्रतत्रैव .

[xxi] द्र१ प.प्र.का ..८

[xxii] द्र४ शौनकशिक्षा कारिका .

[xxiii] द्र१२४ याज्ञवल्क्यशिक्षा कारिका .,१२५। ४२.शिक्षासंग्रहः पृ ,

[xxiv] द्र२९.२.१.का .

[xxv] द्रलघुशब .ेदेन्दुशेखरः १३१.२.

[xxvi] द्र२२९.शिक्षासूत्रम् पृ .

[xxvii] द्र१ ऋग्वेदः ..११.

[xxviii] द्र३ ऋक्प्रातिशाख्यम् ..२

[xxix] द्र१ वाजसनीयप्रातिशाख्यम् ..११०६ प्रातिशाख्यप्रदीपशिक्षा ,

[xxx] द्र१ स्वरभक्तिलक्षणपरिशिष्ठशिक्षा .,३२,

[xxxi] द्र जात्योऽभिनिहितः क्षैप्रः प्रश्लिष्टो .व्यञ्जनस्तिरः ।

तैरविरामः पादवृत्तस्ताथाभाव्यस्तथाऽष्टमः ।। केशवीशिक्षा ४ ।।

xxxii द्र५६ वर्णरत्नप्रदीपशिक्षा .,५७

xxxiii द्र७५ याज्ञवल्क्यशिक्षा .,७६

xxxiv द्र३ ऋक्प्रातिशाख्यम् ..८

xxxv द्र७५ याज्ञवल्क्यशिक्षा .

xxxvi द्र८१ तत्रैव .

xxxvii द्र८२ तत्रैव .

xxxviii द्र .तत्रैव ८३

xxxix द्र८४ तत्रैव .

xl द्र३४ ऋक्प्रातिशाख्यम् स्वरपटलम् .

**सहायकग्रन्थानां सूची**

१. आचार्यः, रामनारायणः, अमरकोशः, भारतीयविद्याप्रकाशनम्, दिल्ली, वाराणसी, १९९९

२. डा. दासः सूर्यकान्तः, अथर्ववेदप्रातिशाख्य, मेहेरचन्द्रलक्ष्मणः, लाहोर, १९३४

३. भट्टः, श्रीमन्मोक्षमूलः, ऋग्वेदः, (चतुर्भागात्मकः) कृष्णदास-एकाडेमी, वाराणसी, १९८३

४. प्रो. वर्मा, वीरेन्द्रकुमारः, ऋग्वेदभाष्यभूमिका, चौखम्वा ओरियेण्टाल, वाराणसी, १९८०

५. होसिङ्ग्, पं. जगन्नाथशास्त्री, मदिनीकोषः, चौखम्बासंस्कृतसिरिज् अफिस् वाराणसी, १९६८

६. प्रोद्विवेदी पारसनाथ ., वैदिक साहित्य का इतिहास, चौखम्बा सुरभारती प्रकाशन, गोपालमन्दिर लेन्, वाराणसी ११२९

७द्विवेदी .डा ., कपिलदेवः, वैदिक साहित्य एवं संस्कृति, विश्वविद्यालय प्रकाशन, वाराणसी, २०१३

८. डा. दीक्षितः, शैलेन्द्रनाथः, शौनकशिक्षा, आचार्यगोपालचन्द्रमिश्रवैदिकउन्नयनसंस्थानम्, सी.के. ३२/१७, ब्रह्मनाल, वाराणसी, वि.सं.२०६७

९. मीमांसकः, युधिष्ठिरः, वैदिकस्वरमीमांसा, रामलाल कपुर ट्रष्ट वहालगढ (सोनिपत्-हरियाणा) वि.सं. २०४२

१०. मीमांसकः, युधिष्ठिरः, शिक्षा-सूत्राणि, (तृतीयसंस्करणम्) रामलाल कपुरट्रष्ट रेवली, सोनीपत्-(हरियाणा), राधाप्रेस कैलाशनगर, दिल्ली, वि.सं.२०२४

११. प्रो. तिवारी, हरिनारायणः, शिक्षासंग्रहः, चौखम्वा संस्कृत सीरीज अफिस, चौखम्वा प्रेस, वाराणसी, प्र.सं २०२०

१२. गोयन्दका, श्रीहरिकृष्णदासः, श्रीमद्भगवत्गीता, शाङ्करभाष्यहिन्दी-अनुवादसहिता, गीताप्रेस्, गोरखपुरम्, सं २०४६